৮.৯ স পুনরিমান্ প্রত্যাহ—কো হসৌ মার্গঃ' ইতি। পুনরিমে ব্রুবতে—'ননু চতস্রোরাজবিদ্যাঃ[৮], ত্রয়ী[৯] বার্তা[১০]-ন্বীক্ষিকী[১১] দণ্ডনীতি[৫]-রিতি। তাসু তিস্রস্ত্রয়ীবার্তান্বীক্ষিক্যো মহত্যো মন্দফলাশ্চ তাস্তাবদাসতাম্। অধীষ্ব তাবদ্দণ্ডনীতিম্। ইয়মিদানীমাচার্যবিষ্ণুগুপ্তেন[১২] মৌর্যার্থে[১৩] ষড়্ভিঃ শ্লোকসহস্রৈঃ সংক্ষিপ্তা। সৈবেয়মধীত্য সম্যগনুষ্ঠীয়মানাযথোক্তকর্মক্ষমা' ইতি। স 'তথা' ইত্যধীতে শৃণোতি চ। তত্রৈব জরাং গচ্ছতি। তত্তু কিল শাস্ত্রং শাস্ত্রান্তরানুবন্ধি। সর্বমেব বাঙ্ময়মবিদিত্বা ন তত্ত্বতো হধিগম্যতে। ভবতু কালেন বহুনাল্পেন বা তদর্থাধিগতিঃ। অধিগতশাস্ত্রেণ চাদাবেব পুত্রাদারমপি ন বিশ্বাস্যম্। আত্মকুক্ষেরপি কৃতে তণ্ডুলৈরিয়দ্ভিরিয়ানোদনঃ সংপদ্যতে। ইয়ত ওদনস্য পাকায়েতাবদিন্ধনং পর্যাপ্তমিতি মানোন্মানপূর্বকং দেয়ম্।'

स पुनरिमान्प्रत्याह–'कोऽसौ मार्गः' इति। पुनरिमे ब्रुवते–'ननु चतस्रो राजविद्यास्त्रयीवार्तान्वीक्षिकीदण्डनीतिरिति तासु तिस्रो त्रयी वार्तान्वीक्षिक्यो महत्यो मन्दफलाश्च, तास्तावदासताम्। अधीष्व तावद्दण्डनीतिम्। इयमिदानीमाचार्य-विष्णुगुप्तेन मौर्यार्थे षड्भिः श्लोकसहस्रैः संक्षिप्ता। सैवेयमधीत्य सम्यगनुष्ठीयमाना यथोक्तकर्मक्षमा' इति। स 'तथा' इत्यधीते शृणोति च। तत्रैव जरां गच्छति। तत्तु किल शास्त्रं शास्त्रान्तरानुबन्धि। सर्वमेव वाङ्मयमविदित्वा न तत्त्वतोऽधिगम्यते। भवतु कालेन बहुनाल्पेन वा

तदर्थाधिगतिः। अधिगतशास्त्रेण चादावेव पुत्रदारमपि न विश्वास्यम्। आत्मकुक्षेरपि कृते तण्डुलैरियद्भिरियानोदनः संपद्यते। इयत ओदनस्य पाकायैतावदिन्धनं पर्याप्तमिति मानोन्मानपूर्वकं देयम्।

টীকা—সপুনরিতি। স (উপদিষ্টঃ) পুনঃ ইমাম্ বক্ষ্যমানাম্ আহ বদতি ইমে (পাষণ্ডিনঃ) ব্রুবতে বদান্তি। নু ভোঃ (প্রশ্নাবধারণানুজ্ঞানুনয়ামন্ত্রণে) ননু। চতস্রঃ চতুর্বিধাঃ রাজ্ঞাম্ বিদ্যাঃ। ত্রয়ী বেদত্রয়ম্ ('ধর্মাধর্মৌ ত্রয়ীস্থিতৌ' ইতি কামন্দকে)। বার্তা অর্থশাস্ত্রম্। ('অর্থানর্থৌতুবার্তায়াম্' ইতি কামন্দকে)। দণ্ডনীতিঃ রাজনীতিঃ। মহত্যঃ বিস্মৃতা। মন্দম্ ফলম্ যাসাম্ তাঃ। তাবৎ প্রথমম্। আসতাম্ তিষ্ঠন্তু। অধীষ্ব পঠ। দণ্ডনীতিম্ রাজনীতিম্। ইয়ম্ (দণ্ডনীতিঃ)। শ্লোকানাং সহস্রৈঃ সংক্ষিপ্তাঃ সংক্ষেপেণ প্রণীতা। সা এব রাজনীতিবিদ্যা এব ইদানীম্ অধুনা। আচার্যেন বিষ্ণুগুপ্তেন চাণক্যেন। মৌর্যস্য চন্দ্রগুপ্তস্য। অর্থে কৃতে। অধীত্য পঠিত্বা। সম্যক্ সুষ্ঠু। অনুষ্ঠীয়মানা আচর্যমাণা। যথোক্তম্ পূর্বম্। যথা উক্তং তৎ কর্ম। তস্মিন্ ক্ষমা সমর্থা। তথা তাম্। অধীতে পঠতি। তত্র অস্মিন্। জরাম্ বৃদ্ধতাম্। কিল নিশ্চয়েন। অন্যৎ শাস্ত্রম্। শাস্ত্রান্তরম্। তৎ অনুবধ্নাতি (তৎসম্বন্ধম্) ইতি—অদঃ। বাঙ্ময়ম্ সাহিত্যম্। অবিদিত্বা অজ্ঞাত্বা। তত্ত্বতঃ—যথার্থতঃ। অধিগম্যতে বুধ্যতে। ভবতু অস্তু। তস্য অর্থস্য বিষয়ম্। অধিগতিঃ প্রাপ্তিঃ। অধিগতম্ শাস্ত্রম্ যেন তেন। আদৌ আরম্ভে। পুত্রাঃদারাশ্চেষাং সমাহারঃ। পুত্রদারং তৎ। বিশ্বাস্যম্ বিশ্বসনীয়ম্। আত্মনঃ স্বস্য। কুক্ষেঃ উদরস্য। কৃতে নিমিত্তম। ইয়দ্ভিঃ মিতৈঃ। ইয়ান্ মিতঃ। ওদনঃ ভক্তম্। সংপদ্যতে সম্পন্নঃ ভবতি। ইয়তঃ এতৎপরিমাণস্য। ওদনস্য ভক্তস্য। ইন্ধনম্ কাষ্ঠম্। মানঃ প্রস্থাদিমিতিঃ উন্মানঃ তুলয়া মিতিঃ ('তুলাবচ্ছেদ উন্মানঃ' ইতি বৈজয়ন্তী) তৎপূর্বকম্ দেয়ম্ দাতব্যমিতি।৯।

আমাদের নির্দেশ পালন করবেন। যদি কেউ প্রশ্ন করে কিরকম এই পন্থা ? তারা উত্তরে বলে থাকে—রাজবিদ্যা চারপ্রকার[৩] তিনবেদ বিষয়ে জ্ঞান ( ত্রয়ী ), কৃষিবাণিজ্যাদির বিদ্যা (বার্তা), আত্মবিজ্ঞান (আন্বীক্ষিকী) ও রাজনীতি (দণ্ড-নীতি )। প্রথম তিনটি বিষয় খুবই ব্যাপক, অথচ ফললাভ ঘটে ধীরে ধীরে। অতএব শুধু দণ্ড-নীতিই অধ্যয়ন করা বাঞ্ছনীয়। অধুনা আচার্য বিষ্ণুগুপ্ত[৪] মৌর্য রাজার প্রয়োজনে ছয় হাজার শ্লোকে সংক্ষেপে এই শাস্ত্র লিপিবদ্ধ করেছেন। এই গ্রন্থ ভাল করে পাঠের পর যথাবথ আচরণ করা হলেই প্রার্থিত ফললাভ সম্ভব। সেই রাজাও এই উপদেশ মেনে নিয়ে শাস্ত্র অধ্যয়ন ও শ্রবণে নিমগ্ন থেকে বার্ধক্যে উপনীত হন। কারণ, এই শাস্ত্র ভাল করে জানতে হলে আর সব শাস্ত্রে জ্ঞান লাভের প্রয়োজন দেখা দেয়। যাই হোক, অল্প বা দীর্ঘ সময়ে হয়তো এই শাস্ত্রজ্ঞান সম্ভব হলো। তারপরে আর স্ত্রী-পুত্রের উপরও বিশ্বাস থাকবে না। পেট ভরানোর ব্যাপারেও নীতি অনুসরণ করা হবে—এইটুকু অন্নের জন্যে এই পরিমাণ তণ্ডুলের প্রয়োজন, পাকের জন্যে এই ইন্ধনই যথেষ্ট—এইভাবে সব হিসাবমত মেপে দিতেই ব্যস্ত হয়ে পড়বেন।

Scanned with CamScanner